346sk18

# १८

# भ्वादिप्रकरणे - लिट्-लकारस्य सूत्रशेषः

## प्रस्तावना

तिङन्तप्रकरणे भूधातुं प्रस्तूय लकारशः सूत्राणि उपस्थाप्यन्ते। तत्र लिटि लकारे इडागमव्यवस्था अन्यतमः मुख्यो विषयः। स पूर्वपाठे सविस्तरं प्रपञ्चितः। लिटि लकारे अवशिष्टानि कानिचन सूत्राणि अस्मिन् पाठे समावेशितानि सन्ति। केषांचिद् धातूनाम् अभ्यासलोपः, अकारस्य एत्वं च भवतीति एको विषयोऽत्र।

मूलधातुतः अपरं प्रत्ययं विधाय सनाद्यन्ता धातव इति सूत्रेण समुदायस्य धातुसंज्ञा भवति। ते च सनादयः द्वादश। एवञ्च यदि धातुः अनेकाच् भवति तर्हि लिटि तस्माद् धातोः कृ भू अस् इति त्रयाणां धातूनाम् अनुप्रयोगः भवति। अतः अनुप्रयोगः इति लिल्लकारे अपरं वैशिष्ट्यम्। एवञ्चान्यानि अपि कानिचन सूत्राणि यानि अग्रिमेषु प्रकरणेषु उपयोक्ष्यन्ते तानि अपि अस्मिन् पाठे अन्तर्भावितानि।

## उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य लिटि मुख्यानि सूत्राणि बुध्यात्।
- विभिन्नानां धातूनां लिटि रूपाणि साधयितुं सामर्थ्यम् अर्जयेत्।
- विविधानि सूत्राणि व्याख्यातुम् समर्थो भवेत्।
- पूर्वपाठेषु कृतानां सार्वधातुकम् आर्धधातुकं संज्ञानां रूपेषु प्रभवं जानीयात्।
- भूधातुरूपाणि साधयित्वा अवशिष्टानि बहुषु लकारे एवञ्च विशिष्य लिटि प्रयुक्तानि सूत्राणि अत्र ज्ञास्यति।
- रहस्यमयम् इडागमप्रकरणम् अस्मिन् पाठे पठिष्यति।

## [१८.१] अत एकहल्मध्येऽनादेशादेर्लिटि॥ (६.४.१२०)

**सूत्रार्थः** - लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च किति लिटि।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण अभ्यासलोपः अत एत्वं च विधीयेते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अतः एकहल्मध्ये अनादेशादेः लिटि इति सूत्रगतपदच्छेदः। अतः (६/१), एकहल्मध्ये (७/१), अनादेशादेः (६/१), लिटि (७/१)। अङ्गस्य (६/१) इत्यधिकृतम्। घ्वसोरेद्धावभ्यासलोपश्च इति सूत्रात् एत् (१/१), अभ्यासलोपः (१/१), च इत्यव्ययम् इति त्रीणि पदानि अनुवर्तन्ते। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रात् किति (७/१) इति पदमायाति। नास्ति आदेशः आदिः यस्य तद् अनादेशादि अङ्गम्, तस्य अनादेशादेः इति बहुव्रीहिसमासः। एकयोः हलोः मध्ये इति एकहल्मध्ये इति षष्ठीतत्पुरुषः समासः। अत्र लिटि इति पदम् आवर्तते। तेन लिटि लिटि इति लभ्यते। पदयोजना - लिटि अनादेशादेः अङ्गस्य एकहल्मध्ये अतः एत् अभ्यासलोपः च किति लिटि। सूत्रार्थो भवति - लिटि परतः यस्य आदेः न कोपि आदेशः जातः तस्य अङ्गस्य अवयवः अत् यदि एकहल्मध्ये, असंयुक्तहल्मध्ये यदि स्यात् तर्हि अतः एकारादेशो भवति, अभ्यासस्य लोपश्च भवति किति लिटि परतः। असंयोगाल्लिट् कित् इति सूत्रेण असंयोगात् परः अपित् लिट् कित् भवति।

अभ्यासलोपः अतः एत्वम् इति कार्यद्वयम् अनेन सूत्रेण भवति। अङ्गस्य अतः पूर्वं परं वा यदि संयोगः न स्यात् तर्हि तस्य अतः भवति। लिटं निमित्तीकृत्य अङ्गस्य आदेशः यदि न स्यात्। लिटि परतः यानि कार्याणि भवन्ति तेषु हलादिः शेषः इति अत्र गण्यते। एवञ्च अभ्यासे चर्च इत्यनेन यदि आदेशे सत्यपि वैरूप्यं न भवति तर्हि स आदेशः न गण्यते। यथा तप् धातोः अभ्यासे तप् तप् इति स्थितौ अभ्यासे चर्च इति सूत्रेण अभ्यासस्य तकारस्य तकार एव विधीयते। तेन रूपस्य वैरूप्यम् अर्थात् रूपविकारः न भवति। अतः ईदृशः आदेशः अत्र न आदेशः।

**उदाहरणम्** - नेदतुः। नेदुः।

**सूत्रार्थसमन्वयः** - णद अव्यक्ते शब्दे इति णोपदेशस्य धातोः धात्वादेः णो नः इति सूत्रेण नकारे नद् इति जायते। ततश्च लिटि तिपि णलि नद् अ इति स्थिते द्वित्वे अभ्यासकार्ये च ननद् अ इति स्थिते अत उपधायाः इति वृद्धौ ननाद इति रूपं सिध्यति।

प्रथमपुरुषद्विवचनस्य तस्-प्रत्यये तस्य स्थाने अतुसि च नद् अतुस् इति स्थितिः। द्वित्वे च नद् नद् अतुस् इति अभ्याससंज्ञायां हलादिशेषे च न नद् अ इति स्थितिः। अत्र लिटं निमित्तीकृत्य कोऽपि आदेशः न जातः। अनभ्यासस्य नद् इत्यस्य अत् असंयुक्तहल्मध्यस्थः। अर्थात् तस्मात् पूर्वं परं च संयोगः नास्ति। अतः प्रकृतसूत्रेण अभ्यासलोपः अतः एत्वं च भवति। तेन नेद् अतुस् इति जाते रुत्वे विसर्गे च कृते **नेदतुः** इति रूपं सिध्यति। एवमन्येषु अपि।

एतस्य सूत्रस्य उदाहरणानि तथा धातुः यस्य हलादिशेषे शिष्टस्य वर्णस्य न कोऽपि आदेशो भवति, एवञ्च धातोः अत् अस्ति इति। यथा पठ् चर् चल् तप् तन् पत् नद् नम् जप् इत्यादयः।

## [१८.२] थलि च सेटि॥ (६.४.१२१)

**सूत्रार्थः** - लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च सेटि थलि।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण एत्वम् अभ्यासलोपः विधीयेते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। थलि (७/१), च इत्यव्ययम्, सेटि (७/१)। अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रात् अतः (६/१), एकहल्मध्ये (७/१), अनादेशादेः (६/१), लिटि (७/१) इति पदानि अनुवर्तन्ते। अङ्गस्य (६/१) इत्यधिकृतम्। घ्वसोरेद्धावभ्यासलोपश्च इति सूत्रात् एत् (१/१), अभ्यासलोपः (१/१), च इत्यव्ययम् इति त्रीणि पदानि अनुवर्तन्ते। इटा सह वर्तते स सेट्, तस्मिन् सेटि। नास्ति आदेशः आदिः यस्य तद् अनादेशादि अङ्गम्, तस्य अनादेशादेः इति बहुव्रीहिसमासः। एकयोः हलोः मध्ये इति एकहल्मध्ये इति षष्ठीतत्पुरुषः समासः। पदयोजना - लिटि अनादेशादेः अङ्गस्य एकहल्मध्ये अतः एत् अभ्यासलोपः च सेटि थलि। सूत्रार्थो भवति - सेटि थलि परतः यस्य आदेः न कोपि आदेशः जातः तस्य अङ्गस्य अवयवः अत् यदि एकहल्मध्ये, असंयुक्तहल्मध्ये यदि स्यात् तर्हि अतः एकारादेशो भवति, अभ्यासस्य लोपश्च भवति सेटि थलि परतः। असंयोगाल्लिट् कित् इति सूत्रेण पित्त्वात् थल् कित् न भवति। अतः नूतनं सूत्रारब्धम्।

**उदाहरणम्** - नेदिथ।

**सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण नद्-धातोः लिटि सिपि थलि इडागमे द्वित्वे अभ्यासकार्ये च न नद् इथ इति स्थितिः। अनेन सूत्रेण एत्वे अभ्यासलोपे च कृते नेद् इथ इति जाते **नेदिथ** इति रूपं सिध्यति।

## पाठगतप्रश्नाः-१

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१. नेद इति रूपे एकारः केन सूत्रेण।

२. नेदिथ इति रूपे एकारः केन सूत्रेण।

३. थलि च सेटि इति सूत्रस्यार्थं लिखत।

४. नेदिथ इत्यत्र कः लकारः, कश्च तिङ्।

 १) लिट् थस् २) लट् थ ३) लिट् सिप् ४) लट् थस्

## [१८.३] गुपूधूपविच्छिपणिपनिभ्य आयः॥ (३.१.२८)

**सूत्रार्थः** - गुपूधूपविच्छिपणिपनिभ्य आयः प्रत्ययः स्यात् स्वार्थे॥

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण आयप्रत्ययः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। गुपूधूपविच्छिपणिपनिभ्यः (५/३), आयः (१/१)। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः (५/१) इति पदमायाति। तस्य पञ्चमीबहुवचनान्ततया विपरिणामः भवति। प्रत्ययः (३.१.१), परश्च (३.१.२) सूत्रद्वयम् अत्र अधिकृतम्। गुपूः च धूपः च विच्छिः च पणिः च पनिः च इति गुपूधूपविच्छिपणिपनयः। तेभ्यः गुपूधूपविच्छिपणिपनिभ्यः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रमिदं प्रत्ययाधिकारे पठितम्। तस्मात् आय इति प्रत्ययः। पदयोजना - गुपूधूपविच्छिपणिपनिभ्यः धातुभ्यः आयः प्रत्ययः परः। सूत्रार्थो भवति - गुपूधूपविच्छिपणिपनिभ्यः धातुभ्यः परः आयः प्रत्ययः भवति। आयप्रत्ययः अदन्तः। धातोः विहितः तिङ्भिन्नः शिद्भिन्नः च। अतः आर्धधातुकं शेषः इति सूत्रेण तस्य आर्धधातुकसंज्ञा भवति।

अस्य प्रत्ययस्य अत्र कोऽपि अर्थः न निर्दिष्टः। अतः अयम् अनिदिर्ष्टार्थः प्रत्ययः। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति इति नियमः। तेन आयप्रत्ययः स्वार्थे भवति, अर्थात् तस्य या प्रकृतिः तदर्थे भवति। अत्र गुप्-धातुतः आयः विहितः चेत् तस्य प्रकृतिः गुप्-धातुः। अतः योऽर्थः गुप्-धातोः तस्मिन्नेवार्थे आयप्रत्ययोऽपि।

सूत्रे गुपूँ रक्षणे - गोपायति (भ्वादिः, प.प.)। धूप सन्तापे - धूपायति (भ्वादिः, प.प.)। विच्छ गतौ विच्छायति (तुदा, प.प.)। पण व्यवहारे स्तुतौ च (भ्वादि, आ.प.), अत्र स्तुत्यर्थकः एव ग्राह्यः, पणायते इति रूपम्। पन स्तुतौ (भ्वादि, आ.प.)।

**उदाहरणम्** - गोपायति।

**सूत्रार्थसमन्वयः** - गुपू रक्षणे रक्षणार्थकाद् ऊदितः गुप्-धातोः गुपूधूपविच्छिपणिपनिभ्य आयः इति सूत्रेण स्वार्थे आयप्रत्यये गुप् आय इति स्थितिः जायते। तत्र आयप्रत्ययः धातोः विहितः तिङ्भिन्नः शिद्भिन्नः च। अतः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञः। पुगन्तलघूपधस्य च इति सूत्रेण गकारोत्तरस्य उकारस्य गुणे स्थानत आन्तर्याद् ओकारे गोप् आय इति वर्णमेलने गोपाय इति शब्दस्वरूपं लभ्यते। आयप्रत्ययः सनादिषु अन्यतमः। स च अन्ते अस्ति गोपाय इति समुदायस्य। अतः सनाद्यन्ता धातव इति सूत्रेण गोपाय इति समुदायस्य धातुसंज्ञा भवति।

ततश्च वर्तमाने लट् इति लटि तिपि शपि गोपाय अ ति इति जाते अतो गुणे इत्यनेन अकाराकारयोः पररूपैकादेशे गोपायति इति रूपं सिध्यति। अन्येषु रूपेषु कोऽपि विशेषो नास्ति।

**गुप्-धातोः लटि रूपाणि - गोपायति गोपायतः गोपायन्ति। गोपायसि गोपायथः गोपायथ। गोपायामि गोपायावः गोपायामः।**

## [१८.४] आयादय आर्धधातुके वा॥ (३.१.३१)

**सूत्रार्थः** - आर्धधातुकविवक्षायाम् आयादयो वा स्युः।



**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन आयप्रत्ययो विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आयादयः आर्धधातुके वा इति सूत्रगतपदच्छेदः। आयादयः (१/३), आर्धधातुके (७/१), वा इत्यव्ययम्। आयः आदिः येषां ते आयादयः इति बहुव्रीहिसमासः। आय ईयङ् णिच् एते त्रयः आयादयः सन्ति। प्रत्ययाधिकारे सूत्रमिदं पठितम्। अतः प्रत्ययः इति पदमायाति किञ्च प्रत्यये इति सप्तम्यन्ततया विपरिणमते। सूत्रार्थो भवति - आर्धधातुकप्रत्ययविवक्षायाम् आयादयः प्रत्ययाः विकल्पेन भवन्ति।

आयविधानात् पूर्वम् आर्धधातुकस्य विधानं न भवति। आर्धधातुकं विना आर्धधातुके परे आयविधानं तु वदतो व्याघातः। अतः अत्र आर्धधातुके इति न परसप्तमी, सा विषयसप्तमी। तेन अग्रे आर्धधातुको विधेयः इति विवक्षा चेत् आयादयः विकल्पेन भवन्ति इति अर्थः फलति।

**उदाहरणे सूत्रार्थसमन्वयः** - गुप्-धातोः अनद्यनभूतपरोक्षार्थवृत्तित्वविवक्षायां परोक्षे लिट् इति सूत्रेण लिट् विधास्यते। लिट् च इति सूत्रेण लिडादेशः तिङ् आर्धधातुकसंज्ञकः अस्ति। अतः गुप्-धातोः आर्धधातुकविधानस्य विवक्षा अस्ति। अतः आयादय आर्धधातुके वा इति प्रकृतसूत्रेण विकल्पेन आयप्रत्यये गुप् आय इति जायते। तत्र आयप्रत्ययस्य आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञा भवति। पुगन्तलघूपधस्य च इति सूत्रेण गकारोत्तरस्य उकारस्य गुणे स्थानत आन्तर्याद् ओकारे गोप् आय इति वर्णमेलने गोपाय इति शब्दस्वरूपं लभ्यते। आयस्य सनादिषु पाठात् गोपाय इति समुदायस्य सनाद्यन्तत्वात् च सनाद्यन्ता धातव इति सूत्रेण गोपाय इति समुदायस्य धातुसंज्ञा भवति।

ततश्च परोक्षे लिट् इति सूत्रेण गोपाय इति धातुतः लिटि गोपाय लिट् इति स्थितिः जाता। तदा -

## कास्यनेकाच आम् वक्तव्यः॥ (वार्तिकम्)

**वार्तिकार्थः** - कास्-धातोः अनेकाच्-धातोः च आम्-प्रत्ययः भवति लिटि परे।

**वार्तिकव्याख्या** - अनेन वार्तिकेन कास्-धातोः परम् अनेकाच्-धातोः परं च आम् प्रत्ययः विधीयते यदि तेभ्यः लिट् परः स्यात्। आम् मान्तः अस्ति। यदि हलन्त्यम् इति सूत्रेण तस्य इत्संज्ञा स्यात् तर्हि आम् मित् स्यात्। तेन मिदचोऽन्त्यात् परः इति वार्तिकेन सः अन्त्यात् अचः परः स्यात्। तदा कास् इत्यत्र आकारात् परः स्यात्। तेन का आ स् इति जायेत। तत्र अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घैकादेशे कास् इत्येव लभ्येत। मूलधातुरपि कास् , आम्-विधानोत्तरम् अपि कास् एव। तेन न कोऽपि लाभः। अतः उच्यते यत् अत्र आमः मस्य इत्त्वं न भवति। तेन स मिदचोऽन्त्यात् परः इति परिभाषा न प्रवर्तते। तथाहि पङ्क्तिः - लिटि आस्कासोराम्विधानान्मस्य नेत्त्वम्।

**उदाहरणम्** - पूर्वसूत्रोक्तप्रकारेण गोपाय लिट् इति स्थितिः। तत्र गोपाय इति अनेकाच् धातुः। ततश्च लिडपि अस्ति। अतः प्रकृतवार्तिकेन आम्-प्रत्यये गोपाय आम् लिट् इति जायते। तदा -



## [१८.५] अतो लोपः॥ (६.४.४८)

**सूत्रार्थः** - आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके॥

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण अतो लोपो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः लोपः इति पदच्छेदः। अतः (६/१), लोपः (१/१)। अङ्गस्य (६/१) इति अधिकृतम्। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति इति सूत्रात् उपदेश इति अनुवर्त्य तस्य सप्तम्यन्ततया विपरिणामः क्रियते। आर्धधातुके (७/१) इति अधिकृतम्। तस्य द्विः आवृत्तिः क्रियते। तेन आर्धधातुके आर्धधातुके इति लभ्यते। सूत्रार्थो भवति - यदा आर्धधातुकस्य उपदेशः क्रियते अर्थात् विधीयते तदा अदन्तस्य अङ्गस्य लोपः भवति यदि अङ्गात् परम् आर्धधातुकं स्यात्। अलोऽन्त्यस्य इति परिभाषया अङ्गस्य अन्त्यस्य अलः अतः एव लोपः भवति।

**उदाहरणे सूत्रार्थसमन्वयः** - पूर्ववार्तिकोक्तप्रकारेण गोपाय आम् लिट् इति स्थितिः। अत्र आम् आर्धधातुकम् उपदिश्यते विधीयते। तदा गोपाय इति अदन्तम् अङ्गमस्ति। तस्मादङ्गात् परे लिट् इति आर्धधातुकमस्ति। अतः अतो लोपः इति सूत्रेण अङ्गस्य अन्त्यस्य अलः अतः लोपे गोपाय् आम् लिट् इति स्थितिः जायते। ततश्च गोपायाम् लिट् इति लभ्यते। तदा -

(कृते अकृते च अतो लोपे गोपायाम् इत्येव लभ्यते। अतः अत्र अतो लोपस्य फलं स्पष्टं नास्ति। अन्येषु उदाहरणेषु फलमस्ति।)

## [१८.६] आमः॥ (२.४.८१)

**सूत्रार्थः** - आमः परस्य लुक्।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण आमः लुक् विधीयते। अस्मिन् सूत्रे आमः (५/१) इति एकं पदम्। ण्यक्षत्रियार्ष-ञितो यूनि लुगणिञोः इति सूत्राद् लुक् इति प्रथमान्तं पदमनुवर्तते। सूत्रार्थो भवति - आमः परस्य लुक् भवति। प्रत्ययस्य लुक्-श्लु-लुपः इत्यनेन प्रत्ययस्य अदर्शनस्य लुक् इति संज्ञा भवति।

**उदाहरणम्** - गोपायाम्।

**सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण गोपायाम् लिट् इति स्थितिः। तत्र आमः इति प्रकृतसूत्रेण आमः परस्य लिटः लुकि गोपायाम् इति लभ्यते। लिट् कृदतिङ् इति कृत्संज्ञकः अस्ति। गोपायाम् इत्यस्मात् लिटः लुकि प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण प्रत्ययलक्षणं कृत्वा गोपायाम् इति कृदन्तम् अस्ति। तस्य च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततश्च स्वौजसमौट्० इति सूत्रेण सुबुत्पत्तौ गोपायाम् सु इति स्थिते आमः इति सूत्रेण सोर्लुकि गोपायाम् इति अवशिष्यते। अस्य च पुनः प्रत्ययलक्षणं कृत्वा सुबन्तत्वम्। अतः सुप्तिङन्तं पदमित्यनेन पदसंज्ञापि सिध्यति। गोपायाम् इत्यवस्थायाम् -

## [१८.७] कृञ् चानुप्रयुज्यते लिटि॥ (३.१.४०)

**सूत्रार्थः** - आमन्तात् लिट्पराः कृभ्वस्तयः अनुप्रयुज्यन्ते।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण कृ भू अस् एतेषाम् अनुप्रयोगः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। कृञ् च अनुप्रयुज्यते लिटि इति सूत्रगतपदच्छेदः। कृञ् (१/१), च इत्यव्ययपदम्, अनुप्रयुज्यते इति तिङन्तं पदम्, लिटि (७/१)। कास्प्रत्ययाद् आम् अमन्त्रे लिटि इति सूत्राद् आम् (१/१) इति पदमनुवर्तते। तस्य च आमः इति पञ्चम्यन्ततया विपरिणामः भवति। पदयोजना - आमः कृञ् च अनुप्रयुज्यते लिटि।

आमः प्रत्ययत्वात् प्रत्ययग्रहणे तदन्ता ग्राह्या इति परिभाषया आमन्तात् इति लभ्यते। कृञ् अत्र प्रत्याहारः। अष्टाध्याय्याम् कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति सूत्रस्थः कृ, कृञो द्वितीयतृतीयशम्बबीजात् कृषौ इति सूत्रस्थेन ञकारेण कृञ् इति भवति। कृञ् इति प्रत्याहारे कृञ् भू अस् ति त्रयो धातवः। सूत्रार्थो भवति - आमन्तात् लिट्पराः कृ भू अस् एते अनुप्रयुज्यन्ते। अर्थात् आमन्तात् लिट्परः कृधातुः, लिट्परः भूधातुः, लिट्परः अस्-धातुश्च प्रयुज्यते। अयम् अनुप्रयोगः कथ्यते।

**उदाहरणे सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण गोपायाम् इति स्थितिः। गोपायाम् आमन्तः शब्दः। तस्मात् अनेन सूत्रेण लिट्परः कृञ् अनुप्रयुक्तः चेत् गोपायाम् कृ लिट् इति स्थितिः जायते। गोपायाम् इति शब्दात् तु लिटः लुक् जातः। अत्र पुनः कृधातोः परं लिट् आगतः।

प्रथमपुरुषैकवचनविवक्षायाम् लिटः स्थाने तिपि तस्य णलि च गोपायाम् कृ अ इति स्थितिः जायते। द्वित्वे गोपायाम् कृ कृ अ इति जायते। तदा -

## [१८.८] उरत्॥ (७.४.६६)

**सूत्रार्थः** - अभ्यासऋवर्णस्य अत् स्यात् प्रत्यये।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण अभ्यासऋकारस्य अत् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। उः अत् इति पदच्छेदः। उः (६/१), ऋकारस्य इयं षष्ठी, अत् (१/१)। लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य (६/१) इति पदमायाति। अत्र अङ्गस्य इति अधिकृतम्। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। पदयोजना - अङ्गस्य अभ्यासस्य उः अत् प्रत्यये। सूत्रार्थो भवति - अभ्यासस्य ऋवर्णस्य स्थाने अत् भवति प्रत्यये परे। ऋवर्णस्य स्थाने उरण् रपरः इति सूत्रेण रपरः सन्नेव प्रवर्तते। अतः अर् आदेशः भवति।

**उदाहरणे सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण गोपायाम् कृ कृ अ इति स्थितिः। तत्र णलि प्रत्यये परे कृ इत्यभ्यासस्य ऋकारस्य स्थाने उरत् इति सूत्रेण अत् इत्यादेशे उरण् रपरः इत्यनेन रपरत्वे गोपायाम् कर् कृ अ इति स्थिते हलादिः शेषः इत्यनेन आदेः हलः शेषे गोपायाम् क कृ अ इति जायते। तत्र अभ्यासककारस्य कुहोश्चु इत्यनेन चुत्वे गुणकृदान्तर्यात् चकारे च कृते गोपायाम् च कृ अ इति जायते। णलो णित्त्वात् अचो ञ्णिति इति सूत्रेण वृद्धौ आकारे उरण् रपरः इत्यनेन रपरत्वे गोपायाम् च



कार् अ इति स्थिते वर्णमेलने गोपायाम् चकार इति लभ्यते। गोपायाम् इत्यस्य पदत्वात् मस्य पदान्तत्वात् हलि परतः मोऽनुस्वारः इति सूत्रेण अनुस्वारे **गोपायांचकार** इति रूपं सिध्यति। तत्रापि वा पदान्तस्य इत्यनेन अनुस्वारस्य विकल्पेन परसवर्णे ञकारे कृते **गोपायाञ्चकार** इत्यपि रूपं सिध्यति।

**गोपायांचक्रतुः** - लिटि प्रथमपुरुषद्विवचनविवक्षायाम् पूर्ववत् गोपायाम् कृ अतुस् इति स्थिते द्वित्वं परत्वात् प्रबाध्य इको यणचि इत्यनेन यणि प्राप्ते द्विर्वचनेऽचि इति सूत्रेण अच आदेशनिषेधे ततः द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ अतुस् इति स्थिते इको यणचि इत्यनेन यणि सस्य रुत्वे विसर्गे च कृते गोपायाम् चक्रतुः इति जाते मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचक्रतुः गोपायाञ्चक्रतुः** च इति रूपे सिध्यतः।

**गोपायांचक्रुः** - प्रथमपुरुषबहुवचनविवक्षायाम् उस्-प्रत्यये पूर्ववत् प्रक्रियया **गोपायांचक्रुः गोपायाञ्चक्रुः** इति रूपे सिध्यतः।

**गोपायांचकर्थ** - मध्यमपुरुषैकवचनविवक्षायां लिटः सिपि तस्य थलि च गोपायाम् कृ थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमः प्राप्तः। कृधातोः उपदेशे एकाच्त्वात् अनुदात्तत्वाच्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण इडागमस्य निषेधो भवति। ततः द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ थ इति स्थिते सार्वधातुकार्धधातुकयोः इत्यनेन गुणे उरण् रपरः इत्यनेन रपरत्वे च गोपायाम् चकर्थ इति लभ्यते। तत्र मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचकर्थ, गोपायाञ्चकर्थ** इति रूपे सिध्यतः।

**गोपायांचक्रथुः** - लिटि मध्यमपुरुषद्विवचनविवक्षायाम् पूर्ववत् गोपायाम् कृ अथुस् इति स्थिते द्वित्वे अभ्यासकार्ये च गोपायाम् चकृ अथुस् इति स्थिते इको यणचि इत्यनेन यणि सस्य रुत्वे विसर्गे च कृते गोपायाम् चक्रथुः इति जाते मस्य अनुस्वारे विकल्पेन परसवर्णे च कृते **गोपायांचक्रथुः गोपायाञ्चक्रथुः** च इति रूपे सिध्यतः।

**गोपायांचक्र** - मध्यमपुरुषबहुवचनविवक्षायाम् अ-प्रत्यये पूर्ववत् प्रक्रियया **गोपायांचक्र गोपायाञ्चक्र** इति रूपे सिध्यतः।

**गोपायांचकार** - उत्तमपुरुषैकवचनविवक्षायाम् मिपि तस्य णलि पूर्ववत् प्रक्रियया गोपायाम् चकृ अ इति स्थिते णलुत्तमो वा इति सूत्रेण विकल्पेन णित्त्वात् अचो ञ्णिति इत्यनेन णित्त्वपक्षे वृद्धौ रपरत्वे च **गोपायांचकार** इति रूपं सिध्यति। णित्त्वाभावपक्षे सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे रपरत्वे **गोपायांचकर** इति रूपं सिध्यति।

**गोपायांचकृव गोपायांचकृम** – उत्तमस्य द्विवचने बहुवचने च पूर्ववत् प्रक्रियया गोपायां कृ व इत्यादिस्थिते असंयोगाल्लिट् कित् इत्यनेन द्विबहुवचनयोः कित्त्वात् क्क्ङिति चेति गुणनिषेधे **गोपायांचकृव गोपायांचकृम** इति रूपे सिध्यतः। विकल्पेन अनुस्वारस्य परसवर्णे इतोऽपि **गोपायाञ्चकृव गोपायाञ्चकृम** इति द्वे रूपे सिध्यतः।

**अस्-धातोः अनुप्रयोगः** - अस्-धातोः अनुप्रयोगे गोपायाम् अस् अ इति स्थिते अस्-धातोः द्वित्वे हलादिशेषे अ अस् अ इति स्थिते अत आदेः इत्यनेन आदेः अतः दीर्घे आ अस् अ इति स्थिते

अकः सवर्णे दीर्घः इत्यनेन आकाराकारयोः दीर्घैकादेशे आस इति लभ्यते। इत्थम् अस्-धातोः अनुप्रयोगे रूपाणि -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गोपायामास | गोपायामासतुः | गोपायामासुः |
| **मध्यमपुरुषः** | गोपायामासिथ | गोपायामासथुः | गोपायामास |
| **उत्तमपुरुषः** | गोपायामास | गोपायामासिव | गोपायामासिम |

**भू-धातोः अनुप्रयोगः** - भू-धातोः अनुप्रयोगे च भूधातोः यथा साधितानि रूपाणि भवन्ति।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | गोपायांबभूव, गोपायाम्बभूव | गोपायांबभूवतुः, गोपायाम्बभूवतुः | गोपायांबभूवुः, गोपायाम्बभूवुः |
| **मध्यमपुरुषः** | गोपायांबभूविथ, गोपायाम्बभूविथ | गोपायांबभूवतुः, गोपायाम्बभूवतुः | गोपायांबभूव, गोपायाम्बभूव |
| **उत्तमपुरुषः** | गोपायांबभूव, गोपायाम्बभूव | गोपायांबभूविव , गोपायाम्बभूविव | गोपायांबभूविम, गोपायाम्बभूविम |

**आयाभावपक्षे गुप्-धातोः रूपाणि** -

गुप्-धातोः आयपक्षे रूपाणि प्रदर्शितानि। आयाभावपक्षे च प्रदर्श्यन्ते।

**जुगोप** - गुप्-धातोः आयादय आर्धधातुके वा इति सूत्रेण विकल्पेन आयविधाने आयाभावपक्षे गुप् लिट् इति जाते लिटः तिपि णलि गुप् अ इति जायते। द्वित्वे गुप् गुप् अ इति जाते अभ्याससंज्ञायाम् हलादिः शेषे कुहोश्चुः इत्यनेन गकारस्य जकारे जु गुप् अ इति जायते। पुगन्तलघूपधस्य च इति सूत्रेण लघूपधगुणे **जुगोप** इति रूपं सिध्यति। द्विवचने बहुवचने असंयोगाल्लिट् कित् इत्यनेन लिटः कित्त्वात् क्ङिति च इत्यनेन गुणनिषेधो भवति। अन्यानि पूर्ववत् कार्याणि भवन्ति। द्विवचने **जुगुपतुः**, बहुवचने **जुगुपुः** इति रूपे सिध्यतः।

गुप्-धातोः मध्यमपुरुषैकवचनविवक्षायां लिटि सिपि थलि गुप् थ इति जाते आर्धधातुकस्येड् वलादेः इत्यनेन थलः इडागमः प्राप्तः। (गुप्-धातोः अननुदात्तत्वात् इडागमस्य निषेधो न भवति।) तदा -

## [१८.९] स्वरतिसूतिसूयतिधूञूदितो वा॥ (७.२.४४)

**सूत्रार्थः** - स्वरत्यादेः ऊदितश्च परस्य वलादेरार्धधातुकस्य इट् वा स्यात्।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन इड् विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। स्वरतिसूतिसूयतिधूञूदितः वा इति पदच्छेदः। स्वरतिसूतिसूयतिधूञूदितः (५/१), वा इत्यव्ययम्। आर्धधातुकस्येड् वलादेः इति समग्रं सूत्रमनुवर्तते। ऊत् इति यस्य स ऊदित्। स्वरतिः च सूतिः च सूयतिः च धूञ् च ऊदित् च इति स्वरतिसूतिसूयतिधूञूदित् इति समाहारद्वन्द्वसमासः। तस्मात् स्वरतिसूतिसूयतिधूञूदितः इति। सूत्रार्थो भवति - स्वरतिसूतिसूयतिधूञूदिद्भ्यः धातुभ्यः वलादेः आर्धधातुकस्य विकल्पेन इट् भवति।

स्वरति - स्वृ शब्दोपतापयोः (भ्वादि, प.प.)। सूति - षूङ् प्राणिगर्भविमोचने (अदा, आ.प.)। सूयति - षूङ् प्राणिप्रसवे (दिवा, आ.प.)। धूञ् - धूञ् कम्पने (स्वादि, क्र्यादि, उ.प.)। ऊदित् - गुपूँ गाहूँ प्रभृतयः धातवः गृह्यन्ते।

**उदाहरणम्** - जुगोपिथ। जुगोप्थ।

**सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण लिटि गुप् थ इति जाते आर्धधातुकस्येड् वलादेः इत्यनेन थलः इडागमः प्राप्तः। तत्राधुना प्रकृतसूत्रेण विकल्पेन इडागमः विधीयते। इडागमपक्षे तु गुप् इथ इति जाते द्वित्वे अभ्यासकार्ये जुगुप् इथ इति स्थितिः जायते। लघूपधगुणे कृते **जुगोपिथ** इति रूपं सिध्यति। इडभावपक्षे तु गुप् थ इति स्थिते द्वित्वे अभ्यासकार्ये लघूपधगुणे च **जुगोप्थ** इति रूपं जायते। उत्तमपुरुषस्य वसि मसि च प्रत्ययेऽपि विकल्पेन इडागमे जुगुपिव जुगुप्व, जुगुपिम जुगुप्म इति रूपाणि सिध्यानि। अन्यानि रूपाणि पूर्ववद् बोध्यानि।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | जुगोप | जुगुपतुः | जुगुपुः |
| **मध्यमपुरुषः** | जुगोपिथ जुगोप्थ | जुगुपथुः | जुगुप |
| **उत्तमपुरुषः** | जुगोप | जुगुपिव जुगुप्व | जुगुपिम जुगुप्म |

## पाठगतप्रश्नाः-२

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

५. गोपायति इति रूपे आयप्रत्ययः केन सूत्रेण।

६. गोपायति इति रूपे कः सनाद्यन्तः धातुः।

७. गोपायति इति रूपे भूवादयो धातव इत्यनेन कस्य धातुसंज्ञा।

८. आयादयः विकल्पेन कुत्र विधीयन्ते।

९. कास्यनेकाच आम् वक्तव्यः इति विहितस्य आमः मकारः इत्संज्ञको न वा।

१०. गोपायाम् इतीह आम्विधानं केन।

११. अतो लोप इति सूत्रस्य वृत्तिं लिखत।

१२. कृञः अनुप्रयोगः केन सूत्रेण।

१३. गोपायाम्बभूव इत्यत्र भूधातोः अनुप्रयोगः केन सूत्रेण।

१४. गुप्-धातोः लिट् किं रूपं नास्ति।

१) जुगोपिथ २) जुगुप्थ ३) जुगुप्म ४) जुगोप्थ

१५. गुप्-धातोः लिट् किं रूपं नास्ति।

१) जुगोपिम २) जुगुप्व ३) जुगुप्म ४) जुगुपिम

## [१८.१०] आदेच उपदेशेऽशिति॥ (६.१.४५)

**सूत्रार्थः** - उपदेशे एजन्तस्य धातोरात्वं न तु शिति।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण आत् विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। आत् एचः उपदेशे अशिति इति पदच्छेदः। आत् (१/१), एचः (६/१), उपदेशे (७/१), अशिति (७/१)। लिटि धातोरनभ्यासस्य इति सूत्रात् धातोः (६/१) पदमायाति। श् इत् शित् इति कर्मधारयसमासः। न शित् अशित् , तस्मिन् अशिति इति नञ्-तत्पुरुषः समासः। अत्र प्रसज्यप्रतिषेधः अस्ति। तेन शिति न इति लभ्यते। धातोः इत्यनेन प्रत्यये इति आक्षिप्यते। शिति प्रत्यये न इत्यत्र तदादिविधिना इत्संज्ञकशकारादौ प्रत्यये परे न इति लभ्यते। आत् इति तपरकरणम्। केवलम् आ एव शिष्यते। एचः धातोः इत्यत्र एचः इति धातोः विशेषणम्। अतः तदन्तविधिना एजन्तस्य धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः एजन्तः तस्य आत् , तस्य स्थाने आत् आदेशः भवति, परन्तु इत्संज्ञकशकारादौ प्रत्यये परतः न भवति। अलोऽन्त्यस्य इति परिभाषया आदेशः अन्त्यस्य अलः स्थाने भवति।

**उदाहरणम्** - ग्लायति।

**सूत्रार्थसमन्वयः** - ग्लै हर्षक्षये इति धातोः लटि तिपि शपि शपः शित्त्वात् नात्र प्रकृतसूत्रस्य प्रवृत्तिः। ततश्च ग्लै अ ति इति स्थिते एचोऽयवायावः इत्यनेन आयादेशे ग्लायति इति रूपं सिध्यति।

ग्लै-धातोः लिटि तिपि णलि ग्लै अ इति स्थितिः। अत्र ग्लैधातोः परम् इत्संज्ञकशकारादिप्रत्ययः नास्ति। अतः प्रकृसूत्रेण ऐकारस्य आत् भवति। तदा ग्ला अ इति जायते। द्वित्वे अभ्यासकार्ये च जग्ला अ इति स्थितिः जायते। तदा -

## [१८.११] आत औ णलः॥ (७.१.३४)

**सूत्रार्थः** - आदन्ताद् धातोः णलः औकारादेशः स्यात्।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण औकारादेशः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आतः औ णलः इति सूत्रगतपदच्छेदः। आतः (५/१), औ (१/१), णलः (६/१)। अङ्गस्य इति अधिकृतमायाति। तच्च अङ्गात् इति पञ्चम्यन्ततया विपरिणमते। आतः अङ्गात् इत्यत्र आतः इति अङ्गात् इत्यस्य विशेषणम्। अतः तदन्तविधिना आदन्ताद् अङ्गात् इति लभ्यते। सूत्रार्थो भवति - आदन्ताद् अङ्गात् धातोः परस्य णलः औकारादेशः भवति। णलि परतः आदन्तम् अङ्गम् धातुरेव भवति। अतः आदन्ताद् धातोः इत्यपि वक्तुं शक्यते।

**उदाहरणम्** - जग्लौ।

**सूत्रार्थसमन्वयः** - पूर्वसूत्रोक्तप्रकारेण जग्ला अ इति स्थितिः। तत्र आदन्तः धातुः ग्ला अस्ति। अतः प्रकृतसूत्रेण णलः औकारादेशे जग्ला औ इति स्थिते वृद्धिरेचि इति सूत्रेण वृद्धौ जग्लौ इति रूपं सिध्यति।

## [१८.१२] गमहनजनखनघसां लोपः क्ङित्यनङि॥ (६.४.९८)

**सूत्रार्थः** - गमहनजनखनघसामुपधाया लोपोऽजादौ क्ङिति न त्वङि।

**सूत्रव्याख्या** - विधिसूत्रमिदम्। अनेन सूत्रेण उपधालोपः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। गमहनजनखनघसाम् लोपः क्ङिति अनङि इति पदच्छेदः। गमहनजनखनघसाम् (६/३), लोपः (१/१), क्ङिति (७/१), अनङि (७/१)। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रात् अचि (७/१) पदमनुवर्तते। ऊदुपधाया गोह इति सूत्रात् उपाधायाः (६/१) पदमायाति। अङ्गस्य इति अधिकृतम्। तेन अङ्गाक्षिप्तम् प्रत्यये इति पदं लभ्यते। क् च ङ् च क्ङौ। क्ङौ इतौ यस्य स क्ङित्, तस्मिन् क्ङिति इति द्वन्द्वगर्भबहुव्रीहिसमासः। गमः च हनः च जनः च घनः च घस् च इति गमहनजनखनघसः, तेषाम् गमहनजनखनघसाम् इति इतरेतरयोगद्वन्द्वसमासः। गमः इत्यादौ मकारादकारः मुखसुखार्थः। पदयोजना - गमहनजनखनघसाम् उपधायाः लोपः क्ङिति अनङि अचि प्रत्यये। अचि प्रत्यये इत्यत्र तदादिविधिना अजादौ प्रत्यये इति लभ्यते। सूत्रार्थो भवति - गम् हन् जन् खन् घस् एषाम् उपधायाः लोपः भवति अजादौ अङ्-प्रत्ययभिन्ने किति ङिति च प्रत्यये परे।

**उदाहरणम्** - जग्मतुः।

**सूत्रार्थसमन्वयः** - गमॢ गतौ इति धातोः लिटि तिपि णलि गम् अ इति स्थिते द्वित्वे अभ्यासकार्ये जगम् अ इति स्थिते उपधावृद्धौ **जगाम** इति रूपं भवति।

गम्-धातोः लिटि तसि अतुसि गम् अतुस् इति स्थिते द्वित्वे अभ्यासकार्ये च जगम् अतुस् इति स्थितिः। अतुसः अपित्त्वात् असंयोगाल्लिट् कित् इत्यनेन कित्त्वं भवति। एवञ्च अङ्-भिन्नः अजादिरपि अतुस् प्रत्ययः। अतः प्रकृसूत्रेण उपधालोपे रुत्वे विसर्गे च **जग्मतुः** इति रूपं सिध्यति।



## पाठगतप्रश्नाः-३

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१६. ग्लायति इति रूपे कः धातुः।

१७. जग्लौ इत्यत्र औकारः कथम्।

१८. जग्मतुः इत्यत्र उपधालोपः केन सूत्रेण।

१९. गम्-धातोः लिटि तसि किं रूपम्।

## पाठसारः

अस्मिन् पाठे लिह्लकारस्य कानिचन सूत्राणि उपन्यस्तानि। तेषु अभ्यासलोपः अकारस्य एत्वम् इति कार्यस्य विधायकं सूत्रद्वयम्। अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं किति लिटि प्रवर्तते। थलः कित्त्वाभावेन अस्य तत्र प्रवृत्तिः नास्ति। अतः थलि च सेटि इति सूत्रम् अवतारितम् पाणिनिमुनिना।

गुपूधूपविच्छिपणिपनिभ्य आयः इति सूत्रेण गुपू-आदिधातुभ्यः आयप्रत्ययः स्वार्थे विधीयते। तेन नूतनं शब्दस्वरूपं निष्पद्यते। तस्य सनाद्यन्ता धातव इति सूत्रेण धातुसंज्ञा भवति। ततश्च धातुसंज्ञाश्रितानि कार्याणि फलन्ति। यो धातुः अनेकाच् भवति तस्मात् आम् प्रत्ययः कास्यनेकाच आम् वक्तव्यः इति सूत्रेण विधीयते। आम् मित् नास्ति। इत्थम् लब्धात् आमन्तात् कृञ् चानुप्रयुज्यते लिटि इति सूत्रेण कृ भू अस् इति एते धातवः लिट्पराः अनुप्रयुज्यन्ते। ततश्च गोपायाञ्चकार गोपायामास गोपायाम्बभूव इत्यादीनि रूपाणि सिध्यन्ति।

आर्धधातुकस्य विकल्पेन इड्विधायकं सूत्रं तावत् स्वरतिसूतिसूयतिधूञूदितो वा इति।

उपदेशे यो धातुः एजन्तः तस्य एचः आकारः भवति यदि शित् प्रत्ययः परः न स्यात्। गमहनजनखनघसां लोपः क्ङित्यनङि इति सूत्रेण अजादौ अङ्भिन्ने किति ङिति च प्रत्यये परे गम् हन् जन् खन् घस् एषाम् उपधायाः लोपः भवति।

## पाठान्तप्रश्नाः

१. अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं व्याख्यात।

२. ससूत्रं रूपाणि साधयत – नेदतुः, नेदुः, नेदिथ, नेदिम।

३. कृञ् चानुप्रयुज्यते लिटि इति सूत्रं व्याख्यात।

४. आयादय आर्धधातुके वा इति सूत्रं व्याख्यात।

५. कास्यनेकाच आम् वक्तव्यः इति विहितस्य आमः मकारः इत्संज्ञक कुतो न।

६. ससूत्रं रूपाणि साधयत – गोपायति, गोपायामि, गोपायाञ्चकार, गोपायाम्बभूव, गोपायामास, जुगोप, जुगुपुः, जुगोपिथ।

७. आदेच उपदेशेऽशिति इति सूत्रं व्याख्यात।

८. ससूत्रं रूपाणि साधयत – जग्लौ, जग्मतुः, जगम, जगाम।

## पाठगतप्रश्नानाम् उत्तराणि

**उत्तराणि- १**

१. अत एकहल्मध्येऽनादेशादेर्लिटि।

२. थलि च सेटि।

३. लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्य असंयुक्तहल्मध्यस्थस्य अतः एत्वम् अभ्यासलोपश्च सेटि थलि।

४. ३

**उत्तराणि- २**

५. गुपूधूपविच्छिपणिपनिभ्य आयः।

६. गोपाय।

७. गुपू रक्षणे इत्यस्य।

८. आर्धधातुकविवक्षायाम् आयादयो विकल्पेन विधीयन्ते।

९. ५

१०. कास्यनेकाच आम् वक्तव्यः।

११. आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके।

१२. कृञ् चानुप्रयुज्यते लिटि।

१३. कृञ् चानुप्रयुज्यते लिटि।

१४. २

१५. १

**उत्तराणि- २**

१६. ग्लै हर्षक्षये।

१७. आत औ णलः इति सूत्रेण णलः औकारः।

१८. गमहनजनखनघसां लोपः क्ङित्यनङि।

१९. जग्मतुः।

॥ इति अष्टदशः पाठः ॥